इति तद्भाष्ये सायनः ॥ प्राणित्यनेनेति करणे ल्युट्) गले, पुं । (इति शब्दचन्द्रिका ॥
प्राणनाथः, पुं,(प्राणानां नाथः ।) पतिः । इति शब्दरत्नावली ॥ ( यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"
स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे ।८।
"धात्रीं स्वात्रीं जनित्रीं प्रकृतिमविकृतिं विश्व शक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")
प्राणन्तः,पुं,(प्राणित्यनेनेति। प्र + अन् + "रुहि नन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणा० ३ । १२७ । इति झच् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ रसाञ्जनम्। इत्युणादि कोषः ॥
प्राणन्ती, स्त्री, (प्र + अन् झच् । स च षित् । षित्वात् ङीष् ।) क्षुत् । हिक्का । इत्युणादिकोषः ॥
प्राणप्रदा,स्त्री,(प्राणं प्रददातीति । प्र + दा + कः) ऋद्धिनामकौषधम् । इति रत्नमाला ॥ (प्राणदातरि, त्रि । यथा,कथासरित्सागरे ।२२।८८।
"त्वाञ्च दृष्टाधुनात्मीयो देवि ! प्राणप्रदः सुहृत् सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः॥")
प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना जलेन वा भास्वान् उद्दीप्तः । समुद्रः । इति शब्दरत्नावली ॥
प्राणमयकोषः,पुं,(प्राणमयः कोषः आच्छादकः।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्तसारः ॥
प्राणसंयमः, पुं, ( प्राणानां संयमः ।) प्राणायामः । यथा, "तदशक्तौ तच्चतुर्थमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ॥
प्राणसद्म, [न्] क्ली, प्राणानां सद्म गृहम् । ) शरीरम् । इति केचित् ॥
प्राणसमा, स्त्री, (प्राणानां समा ।) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे । १ । ३८ ।
"नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥"
प्राणतुल्ये, त्रि । यथा, रामायणे ।१।१।२६ ।
"रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥"
तथा च तत्रैव । २ । ३१ । १० ।
"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे॥"
पत्यौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥)
प्राणहारकं, क्ली, ( प्राणान् हरतीति । हृ + ण्वुल् । ) वत्सनाभः । इति राजनिर्घण्टः ॥
असुनाशके, त्रि ॥
प्राणाः,पुं,(प्राणित्येभिरिति । प्र + अन + करणे घञ् । असवः । इत्यमरः । २ । ८ । ११९ ॥
"हे अङ्गसन्निहितेषु पञ्चवायुषु । अस्यन्ते असवः नाम्नीति उः । प्राणिति एभिः प्राणाः घञ् । एवमिति असुवन् प्राणा अपि पुं बहुत्वे इत्यर्थः असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदेऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा, हितोपदेशे । १ । ७३ ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥")
शरीरस्थपञ्चप्राणा यथा,—
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥"
शरीरस्था इमे————————॥"
इत्यमरः । १ । १ । ६७ ॥
"इमे प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।
"हृदि प्राणो गुदे पानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
एवं तद्व्यापाराश्च यथा,—
अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"
इति च भरतः ॥
प्राणकराणि यथा,—
सद्योमांसं नवान्नञ्च बाला स्त्री चीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
प्राणहराणि यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यकर्म्मलोलोचने ॥
प्राणवियोगकालकर्त्तव्यं यथा,—
कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र शीघ्रं निःसारयेद्गृहात्॥
कुशास्तरणशायी च दिशः सर्वा न पश्यति ।
लब्धस्मृतिमुहूर्त्तात्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्नेहभावेन भूमिं देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ॥
अमृतं क्षरयन्त्यश्च प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन शीघ्रं मुच्येत किल्विषात्॥
पश्चात् श्रुतिपथं दिव्यमुत्कर्णेन च श्रावयेत् ।
यावत्प्राणान् प्रमुच्येत कृत्वा कर्म्म सुदुष्करम्॥
दृष्ट्वा सुविह्वलं दीनं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोचनम् ।
मधुपर्कं त्वरन् गृह्य इदं मन्त्रमुदाहरेत् ॥"
मन्त्रः ।
"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियार्थं
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
तत एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतात् प्राणात् संसारञ्च न गच्छति
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशं गतम् ॥
महावनस्पतिं गत्वा गन्धांश्च विविधानपि ।
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोऽव्ययकरं वास्य तत्सर्व्वं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च॥
तीर्थान्यावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयुर्बलदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत्॥
प्राणाहृतन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ॥
देवानग्निमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"
मन्त्रः ।
"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दहेयं तस्य गात्राणि देवलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवम्भवति पुत्त्रक ! ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥
मृतनाम तथोद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाशौचं देवकर्म्म न कारयेत् ॥"
इति वराहपुराणे श्राद्धोत्पत्तिनामाध्यायः ॥
प्राणा,स्त्री,(प्राणिति बहुकालमिति । प्र + अन् + अच् । टाप् । ) पक्षिणीविशेषः । सा चारुणगरुड़योः श्वश्रूः । यथा,—
"पुलहस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः षड़िति विख्याताः प्राणाया वै विजज्ञिरे॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी
अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ॥
सम्पातिश्च जटायुश्च प्रसूतौ पक्षी सत्तमौ ।
सम्पातिर्जनयन् गृध्रान् काकाः पुत्त्रा जटायुषः
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी॥"
इत्यग्निपुराणम् ॥
प्राणाधिनाथः,पुं, (प्राणानामधिनाथः ।)पतिः । इति हलायुधः । २ । ३४२ ॥
प्राणापानौ, पुं, ( प्राणश्च अपानश्च तौ । तदाख्यकौ वायू । यथा, विष्णुपुराणे ।६।७।४१ ।
"परस्परेणाभिभवं प्राणापानौ यदानिलौ ॥")
अश्विनीकुमारौ । यथा,--
"प्राणापानौ कथं देवावश्विनौ संबभूवतुः ॥"
इति प्रजापालप्रश्ने ।